# गुरुपूर्णिमायाः प्रतिवेदनम्

**03/07/2023**

नवदेहलीस्थे केन्द्रीयसंस्कृतविश्वविद्यालये गुरुपूर्णिमाम् उपलक्ष्य विद्वत्सम्माननं गुरुपूजनाद्याः कार्यक्रमाश्च तृतीये दिनाङ्के (03/07/2023) प्रातः कालादेव समायोजिताः। अपराह्ने द्वादशवादनतः सभाकार्यक्रमः समायोजितः। अस्मिन् विद्वत्सम्माननरूपे कार्यक्रमे अभ्यागतरूपेण समागताः कन्यागुरुकुलानां प्रतिष्ठापनदक्षाः **पद्मश्री आचार्या डा. सुकामा** महोदयाः (कन्यागुरुकुलम्-रोहतक-हरियाणाराज्यम्) गुरोः गुरुकुलस्य गुरुकुलशिक्षापद्धतेश्च विषये सविस्तरम् अवोचन्। **पितृकुलम्-गुरुकुलम्-पतिकुलम् इति कुलत्रयं कीर्त्यते। मध्यस्थं गुरुकुलं पूर्वापरयोः अपेक्षया उत्कृष्टं वर्तते। यतोऽहि इदं गुरुकुलं सम्पर्कसूत्रवत् कार्यं करोति। अन्तेवासी इति कथ्यते शिष्यः। गुरोरन्ते वसतः छात्रस्य गुणस्वभावादयः परिष्कृताः भवन्ति इति।**

सन्दर्भेऽस्मिन् गुरुपूजनं विधाय विश्वविद्यालयस्य कुलपतयः **आचार्य श्रीनिवास वरखेडी वर्याः** अवोचन् यत् भारतीयज्ञानपरम्परायाः परिरक्षणे गुरुशिष्यपरम्परायाः महन्महत्वं वर्तते इति। ते अध्यक्षभाषणे अब्रुवन् यत् -

**"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति भावः भारतीयानाम्। परिसरेषु नवप्रविष्टाः छात्राः गुरुपूर्णिमायाम् अद्य सत्रारम्भसमये व्यासरूपान् आचार्यान् अभ्यर्च्य विद्यारम्भं कुर्वन्ति। गुरोः पूजनेन सर्वे देवाः सन्तुष्टाः भवन्ति। उपनयनोत्तरं गुरुगर्भं प्रविशति बालः। मातृवत् शिष्यान् पालयति गुरुः। अतः सः गुरुमाता इत्यपि कथ्यते। मातृगर्भस्थः शिशुः द्वादश मासेषु जन्म प्राप्य विकसितुमारभते। एवमेव द्वादश वर्षेषु विकसितः गुरुकुलस्थः बालः सर्वाङ्गीणविकासं विन्दति। अतः गुरोः गुरुकुलस्य गुरुशिष्यप्रणाल्याश्च महत्त्वम् आचन्द्रार्कं सन्तिष्ठते इति।**

अस्मिन् कार्यक्रमे डा. चक्रधर मेहेर वर्यः गुरुस्तुतिमकरोत्। शैक्षणिकवृत्त-छात्रकल्याणानुभागयोः अधिष्ठातारः आचार्य बनमाली बिश्वाल वर्याः स्वागतम् अकुर्वन्।

कुलपतयः विद्वत्सम्माननम् अकुर्वन्। डा. सुरभि महोदयायाः अपि सम्माननं सन्दर्भेऽस्मिन् कुलपतिभिः कृतम्। कुलसचिवाः डा. रणजित कुमार बर्मन वर्याः साद्यन्तम् उपस्थिताः आसन्। डा. मधुकेश्वरभट्टवर्याः धन्यवादान्  सर्वेभ्यः समार्पयन्। अस्य कार्यक्रमस्य सुचारुरूपेण सञ्चालनं डा. अमृता कौर महोदया अकरोत्। शान्तिमन्त्रोत्तरं मुख्यालये सर्वेभ्यः अभ्यागतेभ्यः अधिकारिभ्यः कर्मयोगिभ्यः शोधच्छात्रेभ्यश्च सुग्रासभक्षणव्यवस्था परिकल्पिता आसीत्। विश्वविद्यालयस्य गुणवत्तां परीक्ष्य NAAC संस्थया A++ इत्येषा सर्वोत्कृष्टा श्रेणी विश्वविद्यालयाय प्रदत्ता वर्तते इत्यतः सुग्रासभोजनव्यवस्था परिकल्पिता। डा. देवानन्दशुक्लवर्याः, डा. गणेश ति. पण्डितवर्याः सङ्घटनव्यवस्थापनदृष्ट्या च साद्यन्तं कार्यमकुर्वन्। श्री सोनराज पाटिदारवर्यः कार्यक्रमसज्जायै साहाय्यमकरोत्।

डा. देवानन्दशुक्लवर्याः गुरुपूर्णिमाङ्गतया आयोजितानां सर्वविधकार्यक्रमाणां निर्वहणं सुष्ठु विधाय कुलपतीनाम् अभिनन्दनपात्राणि समभवन्।

प्रतिवेदननिर्माणम्



**डा. गणेश ति. पण्डितः**
सहायकनिदेशकः, प्रकाशन-कार्यक्रम अनुभागः
**केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली**


गुरुपूर्णिमा -2023
आचार्योपासनम्
गुरुः - गुरुकुलम् - शिक्षाप्रणाली
आचार्य श्रीनिवासः वरखेडी
कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः
देहली
पद्मश्री आचार्या डा. सुकामा
कन्यागुरुकुलम्, रोहतक , हरियाणाराज्यम्
03 जुलाई, 2023
समयः - अपराह्णे - 12.00 वादनतः
सभागारः , केन्द्रीयसंस्कृतविश्वविद्यालयः
प्रो. रणजित कुमार बर्मन
कुलसचिवः
NAAC
A++
ONE EARTH • ONE FAMILY • ONE FUTURE







